# श्रीचैतन्यचन्द्रामृतम्[1]

Version 0.1

प्रबोधानन्दसरस्वतीरचितम्

April 8, 2001

[1]There are two numbering systems for this text. The material is sometimes organized into twelve themes and numbered accordingly. Those numbers are given in brackets. The editions used were *Stavakalpadruma*, (ed.) Bhakti Saranga Goswami. (Vrindavan: 1959) and *Śrīśrīcaitanyacandrāmṛta*, (ed.) Bhakti Vilasa Tirtha. (Mayapur: Chaitanya Math, 3rd edition, 1992). Texts without an alternative number are not found in either one of the editions. No attempt has been made to provide alternative readings.)

स्तुमस्तं चैतन्याकृतिमतिविमर्यादपरमा
द्भुतौदार्यं वर्यं व्रजपतिकुमारं रसयितुम् ।
विशुद्धस्वप्रेमोन्मदमधुरपीयुषलहरीं
प्रदातुं चान्येभ्यः परपदनवद्वीपप्रकटम् ॥१ ॥ (१)

सर्वैराम्नायचूडामणिभिरपि न संलक्ष्यते यत् स्वरूपं
श्रीशब्रह्माद्यगम्या सुमधुरपदवी कापि यस्यास्ति रम्या ।
येनाकस्माज् जगच्छ्रीहरिरसमदिरामत्तमेतद्व्यधायि
श्रीमच्चैतन्यचन्द्रः स किमु मम गिरां गोचरश्चेतसो वा ॥ २ ॥
(१३७)

धर्मे निष्ठां दधदनुपमां विष्णुभक्तिं गरिष्ठां
संबिभ्राणो दधदहह हृत्तिष्ठतीवाश्मसारम् ।
नीचो गोघ्नादपि जगदहो स्नावयत्यश्रुपूरैः
को वा जानात्यहह गहनं हेअमगौराङ्गरङ्गम् ॥३ ॥ (१२७)

धर्मास्पृष्टः सततपरमाविष्ट एवात्यधर्मे
दृष्टिं प्राप्तो न हि खलु सतां सृष्टिषु क्वापि नो सन् ।
यद्दत्तश्रीहरिरससुधास्वादमत्तः प्रनृत्य
त्युच्चैर्गायत्यथ विलुठति स्तौमि तं कञ्चिदीशम् ॥४ ॥ (२)

अकस्मादेवाविर्भवति भगवन्नामलहरी
परीतानां पापैरपि पुरुभिरेषां तनुभृताम् ।
अहो वज्रप्रायं हृदपि नवनीतायितमभून्
नृणां यस्मिन् लोकेऽवतरति स गौरो मम गतिः ॥५ ॥ (११०)

न योगो न ध्यानं न च जपतपस्त्यागनियमा
न वेदा नाचारः क्व नु बत निषिद्धाद्युपरतिः ।
अकस्माच् चैतन्येऽवतरति दयासारहृदये
पुमर्थानां मौलिं परमिह मुदा लुण्ठति जनः ॥६ ॥ (१११)

यन् नाप्तं कर्मनिष्ठैर्न च समधिगतं यत् तपोध्यानयोगै
वैराग्यैस्त्यागतत्त्वस्तुतिभिरपि न यत् तर्कितं चापि कैश्चित् ।
गोविन्दप्रेमभाजामपि न च कलितं यद्रहस्यं स्वयं तन्
नाम्नैव प्रादुरासीदवतरति परे यत्र तं नौमि गौरम् ॥७ ॥ (३)

धिग् अस्तु ब्रह्माहं वदनपरिफुल्लान् जडमतीन्
क्रियासक्तान् धिग् धिग् विकडतपसो धिक् च यमिनः ।

किमेतान् शोचामो विषयरसमत्तान् नरपशून्
न केषांचिल् लेशोऽप्यहह मिलितो गौरमधुनः ॥८ ॥ (३२)

बध्नन् प्रेमभरप्रकम्पितकरो ग्रन्थीन् कटीडोरकैः
सङ्ख्यातुं निजलोकमङ्गलहरेकृष्णेतिनाम्नां जपन् ।
अश्रुस्नातमुखः स्वमेव हि जगन्नाथं दिदृक्षुर्गता
यातैर्गौरतनुर्विलोचनमुदं तन्वन् हरिः पातु वः ॥९ ॥ (१६)

पाषाणः परिषोचितोऽमृतरसैर्नैवाङ्कुरः सम्भवेत्
लाङ्गूलं सरमापतेर्विवृणतः स्यादस्य नैवार्जवम् ।
हस्तावुन्नयता बुधाः कथमहो धार्यं विधोर्मण्डलं
सर्वं साधनमस्तु गौरकरुणाभावे न भावोत्सवः ॥१० ॥ (३६)

सौन्दर्ये कामकोटिः सकलजनसमाह्लादने चन्द्रकोटिर्
वात्सल्ये मातृकोटिस्त्रिदशविटपितोऽप्यद्भुतौदार्यकोटिः ।
गाम्भीर्येऽम्भोधिकोटिर्मधुरमणि सुधाक्षीरमाध्वीककोटिर्
गौरो देवः स जीयान् प्रणयरसपदे दर्शिताश्चर्यकोटिः ॥ ११ ॥
(१०१)

प्रेमा नामाद्भुतार्थः श्रवणपथगतः कस्य नाम्नां महिम्नः
को वेत्ता कस्य वृन्दावनविपिनमहामाधुरीषु प्रवेशः ।
को वा जानाति राधां परमरसचमत्कारमाधुर्यसीमाम्
एकश्चैतन्यचन्द्रः परमकरुणया सर्वमाविश्चकार ॥१२ ॥ (१३०)

नमश्चैतन्यचन्द्राय कोटिचन्द्राननत्विषे ।
प्रेमानन्दाब्धिचन्द्राय चारुचन्द्रांशुहासिने ॥१३ ॥ (८)

यस्यैव पादाम्बुजभक्तिलभ्यः
प्रमाभिधानः परमः पुमर्थः ।
तस्मै जगन्मङ्गलमङ्गलाय
चैतन्यचन्द्राय नमो नमस्ते ॥१४ ॥ (९)

दधन् मूर्धन्यूर्ध्वं मुकुलितकराम्भोजयुगलं
गलन्नेत्राम्भोभिः स्नपितमृदुगण्डस्थलयुगम् ।
दुकूलेनावीतं नवकमलकिञ्जल्करुचिना
परं ज्योतिर्गौरं कनकरुचिरचौरं प्रणमत ॥१५ ॥ (८१)

सिंहस्कन्धं मधुरमधुरं स्मेरगण्डस्थलान्तं

दुर्विज्ञेयोज्ज्वलरसमयाश्चर्यनानाविकारम् ।
बिभ्रत् कान्तिं विकचकनकाम्भोजगर्भाभिरामाम्
एकीभूतं वपुरवतु वो राधया माधवस्य ॥ १६ ॥ (१३)

पूर्णप्रेमरसामृताब्धिलहरीलोलाङ्गगौरच्छटा
कोट्याच्छादितविश्वमीश्वरविधिव्यासादिभिः संस्तुतम् ।
दुर्लक्ष्यां श्रुतिकोटिभिः प्रकटयन् मूर्तिं जगन्मोहिनीम्
आश्चर्यं लवणोदरोधसि परं ब्रह्म स्वयं नृत्यति ॥ १७ ॥ (१३१)

उद्दामदामनकदामगणाभिराम
मारामराममविरामगृहीतनामा ।
कारुण्यधाम कनकोज्ज्वलगौरधाम
चैतन्यनाम परमं कलयाम धाम ॥ १८ ॥ (६९)

अवतीर्णे गौरचन्द्रे विस्तीर्णे प्रेमसागरे ।
सुप्रकाशितरत्नौघे यो दीनो दीन एव सः ॥ १९ ॥ (३४)

श्रवणमननसङ्कीर्त्यादिभक्त्या मुरारेर्
यदि परमपुमर्थं साधयेत् कोऽपि भद्रम् ।
मम तु परमपारप्रेमपीयूषसिन्धोः
किमपि रसरहस्यं धाम गौरं नमस्यम् ॥ २० ॥ (५८)

निष्ठां प्राप्ता व्यवहृतिततिर्लौकिकी वैदिकी या
या वा लज्जा प्रहसन्समुद्गाननाट्योत्सवेषु ।
ये वाभुवन्नहह सहजप्राणदेहार्थधर्मा
गौरश्चौरः सकलमहरत् कोऽपि मे तीव्रवीर्यः ॥ २१ ॥ (६०)

महाकर्मस्रोतोनिपतितमपि स्थैर्यमयते
महापाषाणेभ्योऽप्यतिकठिनमेति द्रवदशाम् ।
नटत्यूर्ध्वं निःसाधनमपि महायोगिमनसां
भुवि श्रीचैतन्येऽवतरति मनश्चित्रविभवे ॥ २२ ॥ (११२)

स्त्रीपुत्रादिकथां जहुर्विषयिणः शास्त्रप्रवादं बुधा
योगीन्द्रा विजहुर्मरुन्नियमजक्लेशं तपस्तापसाः ।
ज्ञानाभ्यासविधिं जहुश्च यतयश्चैतन्यचन्द्रे पराम्
आविष्कुर्वति भक्तियोगपदवीं नैवान्य आसीद्रसः ॥ २३ ॥ (११३)

भ्रान्तं यत्र मुनीश्वरैरपि पुरा यस्मिन् क्षमामण्डले

कस्यापि प्रविवेश नैव धिषणा यद्वेद नो वा शुकः ।
यत्र क्वापि कृपामयेन च निजेऽप्युद्घाटितं शौरिणा
तस्मिन्नुज्ज्वलभक्तिवर्त्मनि सुखं खेलन्ति गौरप्रियाः ॥ २४ ॥
(१८)

ईशं भजन्तु पुरुषार्थचतुष्टयाशा
दासा भवन्तु च विधाय हरेरुपासाः ।
किञ्चिद्रहस्यपदलोभितधीरहं तु
चैतन्यचन्द्रचरणं शरणं करोमि ॥ २५ ॥ (५९)

अप्यगण्यमहापुण्यमनन्यशरणं हरेः ।
अनुपासितचैतन्यमधन्यं मन्यते मतिः ॥ २६ ॥ (३१)

भ्रातः कीर्तय नाम गोकुलपतेरुद्दामनामावलीं
यद्वा भावय तस्य दिव्यमधुरं रूपं जगन्मोहनम् ।
हन्त प्रेममहारसोज्ज्वलपदे नाशापि ते सम्भवेत्
श्रीचैतन्यमहाप्रभोर्यदि कृपादृष्टिः पतेन् न त्वयि ॥ २७ ॥ (८२)

भूतो वा भवितापि वा भवति वा कस्यापि यः कोऽपि वा
सम्बन्धो भगवत्पदाम्बुजरसे नास्मिन् जगन्मण्डले ।
तत् सर्वं निजभक्तिरूपपरमैश्वर्येण विक्रीडतो
गौरस्यैव कृपाविजृम्भिततया जानन्ति निर्मत्सराः ॥ २८ ॥ (२८)

स्वादं स्वादं मधुरिमभरं स्वीयनामावलीनां
मादं मादं किमपि विवशीभूतविस्रस्तगात्रः ।
वारं वारं व्रजपतिगुणान् गाय गायेति जल्पन्
गौरो दृष्टः सकृदपि न यैर्दुर्घटा तेषु भक्तिः ॥ २९ ॥ (३८)

अभूद्गेहे गेहे तुमुलहरिसङ्कीर्तनरवो
बभौ देहे देहे विपुलपुलकाश्रुव्यतिकरः ।
अपि स्नेहे स्नेहे परममधुरोत्कर्षपदवी
दवीयस्याम्नायादपि जगति गौरेऽवतरति ॥ ३० ॥ (११४)

जाड्यं कर्मसु कुत्रचिज् जपतपोयोगादिकं कुत्रचिद्
गोविन्दार्चनविक्रिया क्वचिदपि ज्ञानाभिमानः क्वचित् ।
श्रीभक्तिः क्वचिदुज्ज्वलापि च हरेर्वाङ्मात्र एव स्थिता
हा चैतन्य कुतो गतोऽसि पदवी कुत्रापि ते नेक्ष्यते ॥ ३१ ॥ (१३८)

विना बीजं किं नाङ्कुरजननमन्धोऽपि न कथं

प्रपश्येन् नो पङ्गुर्गिरिशिखरमारोहति कथम् ।
यदि श्रीचैतन्ये हरिरसमयाश्चर्यविभवेऽ
प्यभक्तानां भावी कथमपि परप्रेमरभसः ॥ ३२ ॥ (३९)

अकस्मादेवैतद्भुवनमभितः ल्लावितमभून्
महाप्रेमाम्भोधेः किमपि रसवन्याभिरखिलम् ।
अकस्माच् चादृष्टश्रुतचरविकारैरलमभूच्
चमत्कारः कृष्णे कनकरुचिराङ्गेऽवतरति ॥ ३३ ॥ (११५)

अरे मूढा गूढां विचिनुत हरेर्भक्तिपदवीं
दवीयस्या दृष्ट्याप्यपरिचितपूर्वां मुनिवरैः ।
न विश्रम्भश्चित्ते यदि यदि च दौर्लभ्यमिव तत्
परित्यज्याशेषं व्रजत शरणं गौरचरणम् ॥ ३४ ॥ (८०)

तावद्ब्रह्मकथा विमुक्तपदवी तावन् न तिक्तीभवेत्
तावच् चापि विशृङ्खलत्वमयते नो लोकवेदस्थितिः ।
तावच् छास्त्रविदां मिथः कलकलो नानाबहिर्वर्त्मसु
श्रीचैतन्यपदाम्बुजप्रियजनो यावन् न दिग्गोचरः ॥ ३५ ॥ (१९)

सदा रङ्गे नीलाचलशिखरशृङ्गे विलसतो
हरेरेव भ्राजन्मुखकमलभृङ्गेक्षणयुगम् ।
समुत्तुङ्गप्रेमोन्मदरसतरङ्गं मृगदृशाम्
अनङ्गं गौराङ्गं स्मरतु गतसङ्गं मम मनः ॥ ३६ ॥ (७०)

क्वचित् कृष्णावेशान् नटति बहुभङ्गीमभिनयन्
क्वचिद्राधाविष्टो हरि हरि हरीत्यार्तरुदितः ।
क्वचिद्रिङ्गन् बालः क्वचिदपि च गोपालचरितो
जगद्गौरो विस्मापयति बहुभङ्गीमधुरिमा ॥ ३७ ॥ (१२८)

अये न कुरु साहसं तव हसन्ति सर्वोद्यमं
जनाः परित उन्मदा हरिरसामृतास्वादिनः ।
इदं तु निभृतं शृणु प्रणयवस्तु प्रस्तूयते
यदेव निगमेषु तत् पतिरयं हि गौरः परम् ॥ ३८ ॥ (८३)

उद्गृह्णन्ति समस्तशास्त्रमभितो दुर्वारगर्वायिता
धन्यंमन्यधियश्च कर्मतपाअद्युच्चावचेषु स्थिताः ।
द्वित्राण्येव जपन्ति केचन हरेर्नामानि वामाशयाः

पूर्वं सम्प्रति गौरचन्द्र उदिते प्रेमापि साधारणः ॥ ३९ ॥ (११६)

पापीयान् अपि हीनजातिरपि दुःशीलोऽपि दुष्कर्मणां
सीमापि श्वपचाधमोऽपि सततं दुर्वासनाढ्योऽपि च ।
दुर्देशप्रभवोऽपि तत्र विहितावासोऽपि दुःसङ्गतो
नष्टोऽप्युद्धृत एव येन कृपया तं गौरमेव स्तुमः ॥ ४० ॥ (७८)

अचैतन्यमिदं विश्वं यदि चैतन्यमीश्वरम् ।
न विदुः सर्वशास्त्रज्ञा ह्यपि भ्राम्यन्ति ते जनाः ॥ ४१ ॥ (३७)

देवे चैतन्यनामन्यवतरति सुरप्रार्थ्यपादाब्जसेवे
विष्वद्रीचीः प्रविस्तारयति सुमधुरप्रेमपीयूषवीचीः ।
को बालः कश्च वृद्धः क इह जडमतिः को बुधः को वराकः
सर्वेषामैकरस्यं किमपि हरिपदे भक्तिभाजां बभूव ॥ ४२ ॥ (११७)

दत्त्वा यः कमपि प्रसादमथ सम्भाष्य स्मितश्रीमुखं
दूरात् स्निग्धदृशा निरीक्ष्य च महाप्रेमोत्सवं यच्छति ।
येषां हन्त कुतर्ककर्कशधियां तत्रापि नात्यादरः
साक्षात् पूर्णरसावतारिणि हरौ दुष्टा अमी केवलम् ॥ ४३ ॥ (४५)

काशीवासान् अपि न गणये किं गयां मार्गयेऽहं
मुक्तिः शुक्तीभवति यदि मे कः परार्थप्रसङ्गः ।
त्रासाभासः स्फुरति न महारौरवेऽपि क्व भीतिः
स्त्रीपुत्रादौ यदि कृपयते देवदेवः स गौरः ॥ ४४ ॥ (९९)

बेलायां लवणोदधेर्मधुरिमप्राग्भावसारस्फुरल्
लीलायां नववल्लवीरसनिधेरावेशयन्ती जगत् ।
खेलायामपि शैशवे निजरुचा विश्वैकसंमोहिनी
मूर्तिः काचन काञ्चनद्रवमयी चित्ताय मे रोचते ॥ ४५ ॥ (१२९)

दृष्ट्वा माद्यति नूतनाम्बुदचयं संवीक्ष्य बर्हं भवेद्
अत्यन्तं विकलो विलोक्य वलितां गुञ्जावलीं वेपते ।
दृष्टे श्यामकिशोरकेऽपि चकितं धत्ते चमत्कारिताम्
इत्थं गौरतनुः प्रचारितनिजप्रेमा हरिः पातु वः ॥ ४६ ॥ (१४)

दुष्कर्मकोटिनिरतस्य दुरन्तघोर
दुर्वासनानिगडशृङ्खलितस्य गाढम् ।
क्लिश्यन् मतेः कुमतिकोटिकदर्थितस्य
गौरं विनाद्य मम को भवितेह बन्धुः ॥ ४७ ॥ (५१)

हा हन्त चित्तभुवि मे परमोषरायां
सद्भक्तिकल्पलतिकाङ्कुरिता कथं स्यात् ।
हृद्येकमेव परमाशसनीयमस्ति
चैतन्यनाम कलयन् न कदापि शोच्यः ॥ ४८ ॥ (५३)

कृपासिन्धुः सन्ध्यारुणरुचिरचित्राम्बरदरो
ज्ज्वलः पूर्णप्रेमामृतमयमहाज्योतिरमलः ।
शचीगर्भक्षीराम्बुधिभव उदाराद्भुतकलः
कलानाथः श्रीमान् उदयतु मम स्वान्तनभसि ॥ ४९ ॥ (१५)

क्व तावद्वैराग्यं क्व च विषयवार्तासु नरके
ष्विवोद्वेगः क्वासौ विनयभरमाधुर्यलहरी ।
क्व तत् तेजो वालौकिकमथ महाभक्तिपदवी
क्व सा वा सम्भाव्या यदवकलितं गौरगतिषु ॥ ५० ॥ (२०)

स्वपादाम्भोजैकप्रणयलहरीसाधनभृतां
शिवब्रह्मादीनामपि च सुमहाविस्मयभृताम् ।
महाप्रेमावेशात् किमपि नटनामुन्मद इव
प्रभुर्गौरो जीयात् प्रकटपरमाश्चर्यमहिमा ॥ ५१ ॥ (१०२)

सर्वे नारदशङ्करादय इहायाताः स्वयं श्रीरपि
प्राप्ता देवहलायुधोऽपि मिलितो जाताश्च ते वृष्णयः ।
भूयः किं व्रजवासिनोऽपि प्रकटा गोपालगोप्यादयः
पूर्णप्रेमरसेश्वरेऽवतरति श्रीगौरचन्द्रे भुवि ॥ ५२ ॥ (११८)

भृत्याः स्निग्धा अथ सुमधुरप्रोज्ज्वलोदारभाजस्
तत्पादाब्जद्वितयसविधे सर्व एवावतीर्णाः ।
प्रापुः पूर्वाधिकतरमहाप्रेमपीयूषलक्ष्मीं
स्वप्रेमाणं वितरति जगत्यद्भुतं हेमगौरे ॥ ५३ ॥ (११९)

अलौकिक्या प्रेमोन्मदरसविलासप्रथनया
न यः श्रीगोविन्दानुचरसचिवेष्वेषु कृतिषु ।
महाश्चर्यं प्रेमोत्सवमपि हठाद्दातरि न यन्
मतिर्गौरे साक्षात् पर इह स मूढो नरपशुः ॥ ५४ ॥ (४०)

असङ्ख्याः श्रुत्यादौ भगवदवतारा निगदिताः
प्रभावं कः सम्भावयतु परमीशादितरतः ।
किमन्यत् मत्प्रेष्ठे कति कति सतां नाप्यनुभवास्

तथापि श्रीगौरे हरि हरि न मूढा हरिधियः ॥५५ ॥ (४१)

रक्षोदैत्यकुलं हतं कियदिदं योगादिवर्त्मक्रिया
मार्गो वा प्रकटीकृतः कियदिदं सृष्ट्यादिकं वा कियत् ।
मेदिन्युद्धरणादिकं कियदिदं प्रेमोज्ज्वलाया महा
भक्तेर्वर्त्मकरीं परां भगवतश्चैतन्यमूर्तिं स्तुमः ॥५६ ॥ (७)

साक्षान्मोक्षादिकार्थान् विविधविकृतिभिस्तुच्छतां दर्शन्तं
प्रेमानन्दं प्रसूते सकलतनुभृतां यस्य लीलाकटाक्षः ।
नासौ वेदेषु गूढो जगति यदि भवेदीश्वरो गौरचन्द्रस्
तत्प्राप्तोऽनीशवादः शिव शिव गहने विष्णुमाये नमस्ते ॥५७ ॥
(४२)

वासो मे वरमस्तु घोरदहनव्यालावलीपञ्जरे
श्रीचैतन्यपदारविन्दविमुखैर्मा कुत्रचित् सङ्गमः ।
वैकुण्ठादिपदं स्वयं च मिलितं नो मे मनो लिप्सते
पादाम्भोजरसच्छटा यदि मनाक् गौरस्य नो रस्यते ॥ ५८ ॥
(६५)

सकृन् नयनगोचरीकृततदश्रुधाराकुल
प्रफुल्लकमलेक्षणप्रणयकातरश्रीमुखः ।
न गौरचरणं जिहासति कदापि लोकोत्तर
स्फुरन्मधुरिमार्णवं नवनवानुरागोन्मदः ॥५९ ॥ (२१)

आचर्य धर्मं परिचर्य विष्णुं
विचर्य तीर्थानि विचार्य वेदान् ।
विना न गौरप्रियपादसेवां
वेदादिदुष्प्रापपदं विदन्ति ॥६० ॥ (२२)

ज्ञानादिवर्त्मविरुचिं व्रजनाथभक्ति
रीतिं न वेद्मि न च सद्गुरवो मिलन्ति ।
हा हन्त हन्त मम कः शरणं निगूढ
गौरो हरिस्तव न कर्णपथं गतोऽस्ति ॥६१ ॥ (८४)

मृग्यापि सा शिवशुकोद्धवनारदाद्यैर्
आश्चर्यभक्तिपदवी न दवीयस्ती नः ।
दुर्बोधवैभवपते मयि पामरेऽपि
चैतन्यचन्द्र यदि ते करुणाकटाक्षः ॥६२ ॥ (५५)

वृथावेशं कर्मस्वपनयत वार्तामपि मनाक्
न कर्णाभ्यर्णेऽपि क्वचन नयताध्यात्मसरणेः ।
न मोहं देहादौ भजत परमाश्चर्यमधुरः
पुमर्थानां मौलिर्मिलति भवतां गौरकृपया ॥ ६३ ॥ (८५)

अलं शास्त्राभ्यासैरलमहह तीर्थाटनिकया
सदा योषिद्वाघ्र्यास्त्रसत वितथं थूत्कुरुत रे ।
तृणंमन्या धन्याःय्श्रयत किल सन्न्यासिकपटं
नटन्तं गौराङ्गं निजरसमदादम्बुधितटे ॥ ६४ ॥ (८६)

उच्चैरास्फालयन्तं करचरणमहो हेमदण्डप्रकाण्डौ
बाहू प्रोद्धृत्य सत्ताण्डवतरलतनुं पुण्डरीकायताक्षम् ।
विश्वस्यामङ्गलघ्नं किमपि हरिहरीत्युन्मदानन्दनादैर्
वन्दे तं देवचूडामणिमतुलरसाविष्टचैतन्यचन्द्रम् ॥ ६५ ॥ (१०)

हुङ्कारैर्दशदिङ्मुखं मुखरयन्नट्टहासच्छटा
वीचीभिः स्फुटकुन्दकैरवगणप्रोद्भासि कुर्वन् नभः ।
सर्वाङ्गः पवनोच्चलच्चलदलप्रायप्रकम्पं दधन्
मत्तः प्रेमरसोन्मदाद्भुतगतिर्गौरो हरिः शोभते ॥ ६६ ॥ (१०६)

क्व सा निरङ्कुशकृपा क्व तद्वैभवमद्भुतम् ।
क्व सा वत्सलता शौरे यादृक् गौरे तवात्मनि ॥ ६७ ॥ (५६)

आनन्दलीलामयविग्रहाय
हेमाभदिव्यच्छविसुन्दराय ।
तस्मै महाप्रेमरसप्रदाय
चैतन्यचन्द्राय नमो नमस्ते ॥ ६८ ॥ (११)

महापुरुषमानिनां सुरमुनीश्वराणां निजं
पदाम्बुजमजानतां किमपि गर्वनिर्वासनम् ।
अहो नयनगोचरं निगमचक्रचूडाचयं
शचीसुतमचीकरत् क इह भूरिभाग्योदयः ॥ ६९ ॥ (२९)

आस्तां नाम महान् महान् इति रवः सर्वक्षमामण्डले
लोके वा प्रकटास्तु नाम महती सिद्धिश्चमत्कारिणी ।
कामं चारुचतुर्भुजत्वमयतामाराध्य विश्वेश्वरं
चेतो मे बहुमन्यते नहि नहि श्रीगौरभक्तिं विना ॥ ७० ॥ (६६)

निर्दोषश्चारुनृत्यो विधुतमलिनतावक्रभावः कदाचिन्

निःशेषप्राणितापत्रयहरणमहाप्रेमपीयूषवर्षी ।
उद्भूतः कोऽपि भाग्योदयरुचिरशचीगर्भदुग्धाम्बुराशेर्
भक्तानां हृच्चकोरस्वदितपदरुचिर्भाति गौराङ्गचन्द्रः ॥ ७१ ॥ (१०७)

देवा दुन्दुभिवादनं विदधिरे गन्धर्वमुख्या जगुः
सिद्धाः सन्ततपुष्पवृष्टिभिरिमां पृथ्वीं समाच्छादयन् ।
दिव्यस्तोत्रपरा महर्षिनिवहाः प्रीत्योपतस्थुर्निज
प्रेमोन्मादिनि ताण्डवं रचयति श्रीगौरचन्द्रे भुवि ॥ ७२ ॥ (१३३)

मत्तकेशरिकिशोरविक्रमः
प्रेमसिन्धुजगदाप्लवोद्यमः ।
कोऽपि दिव्यनवहेमकन्दली
कोमलो जयति गौरचन्द्रमाः ॥ ७३ ॥ (१००)

अलङ्कारः पङ्केरुहनयननिःस्यन्दिपयसां
पृषद्भिः सन्मुक्ताफलसुललितैर्यस्य वपुषि ।
उदञ्चद्रोमाञ्चैरपि च परमा यस्य सुषमा
तमालम्बे गौरं हरिमरुणरोचिष्णुवसनम् ॥ ७४ ॥ (७१)

कन्दर्पादपि सुन्दरः सुरसरित्पूरादहो पावनः
शीतांशोरपि शीतलः सुमधुरो माध्वीकसारादपि ।
दाता कल्पमहीरुहादपि महान् स्निग्धो जनन्या अपि
प्रेम्णा गौरहरिः कदा नु हृदि मे ध्यातुः पदः धास्यति ॥ ७५ ॥ (७२)

पुञ्जं पुञ्जं मधुरमधुर्प्रेममाध्वीरसानां
दत्त्वा दत्त्वा स्वयमुरुदयो मोदयन् विश्वमेतत् ।
एको देवः कटितटमिलन्मञ्जुमाञ्जिष्टवासा
भासा निर्भर्त्सितनवतडित्कोटिरेव प्रियो मे ॥ ७६ ॥ (७३)

दृष्टः स्पृष्टः कीर्तितः संस्मृतो वा
दूरस्थैरप्यानतो वादृतो वा ।
प्रेम्णः सारं दातुमीशो य एकः
श्रीचैतन्यं नौमि देवं दयालुम् ॥ ७७ ॥ (४)

सिञ्चन् सिञ्चन् नयनपयसा पाण्डुगण्डस्थलान्तं
मुञ्चन् मुञ्चन् प्रतिमुहुरहो दीर्घनिःश्वासजातम् ।
उच्चैः क्रन्दन् करुणकरुणो दीर्घहाहेतिनादो

गौरः कोऽपि व्रजविरहिणीभावमग्नश्चकास्ति ॥ ७८ ॥ (१०८)

किं तावद्धत दुर्गमेषु विफलं योगादिमार्गेष्वहो
भक्तिं कृष्णपदाम्बुजे विदधतः सर्वार्थमालुण्ठतः ।
आशा प्रेममहोत्सवे यदि शिवब्रह्माद्यलभ्येऽद्भुते
गौरे धामनि दुर्विगाहमहिमोदारे तदा रज्यताम् ॥ ७९ ॥ (८७)

हसन्त्युच्चैरुच्चैरहह कुलवध्वोऽपि परितो
द्रवीभावं गच्छन्त्यपि कुविषयग्रावघटिताः ।
तिरस्कुर्वन्त्यज्ञा अपि सकलशास्त्रज्ञसमितिं
क्षितौ श्रीचैतन्येऽद्भुतमहिमसारेऽवतरति ॥ ८० ॥ (१२०)

प्रायश्चैतन्यमासीदपि सकलविदां नेह पूर्वं यदेषां
खार्वा सर्वार्थसारेऽप्यकृत नहि पदं कुण्ठिता बुद्धिवृत्तिः ।
गम्भीरोदारभावोज्ज्वलरसमधुरप्रेमभक्तिप्रवेशः
केषां नासीदिदानीं जगति करुणया गौरचन्द्रेऽवतीर्णे ॥ ८१ ॥
(१२१)

अभिव्यक्तो यत्र द्रुतकनकगौरो हरिरभून्
महिम्ना तस्यैव प्रणयरसमग्नं जगदभूत् ।
अभूदुच्चैरुच्चैस्तुमुलहरिसङ्कीर्तनविधिः
स कालः किं भूयोऽप्यहह परिवर्तते मधुरः ॥ ८२ ॥ (१३९)

सैवेयं भुवि धन्यगौडनगरी वेलापि सैवाम्बुधेः
सोऽयं श्रीपुरुषोत्तमो मधुपतेस्तान्येव नामानि च ।
नो कुत्रापि निरीक्ष्यते हरि हरि प्रेमोत्सवस्तादृशो
हा चैतन्य कृपानिधान तव किं विक्षे पुनर्वैभवम् ॥ ८३ ॥ (१४०)

अपारावारं चेदमृतमयपाथोधिमधिकं
विमथ्य प्राप्तं स्यात् किमपि परमं सारमतुलम् ।
तथापि श्रीगौराकृतिमदनगोपालचरण
च्छटास्पृष्टानां तद्वहति विकटामेव कटुताम् ॥ ८४ ॥ (२३)

तृणादपि सुनीचता सहजसौम्यमुग्धाकृतिः
सुधामधुरभाषिता विषयगन्धथूथूत्कृतिः ।
हरिप्रणयविह्वला किमपि धीरनारम्भिता
भवन्ति किल सद्गुणा जगति गौरभाजाममी ॥ ८५ ॥ (२४)

कदा शौरे गौरे वपुषि परमप्रेमरसदे

सदेकप्राणे निष्कपटकृतभावोऽस्मि भविता ।
कदा वा तस्यालौकिकसदनुमानेन मम हृद्य्
अकस्मात् श्रीराधापदनखमणिज्योतिरुदभूत् ॥८६ ॥ (६८)

अश्रूणां किमपि प्रवाहनिवहैः क्षौणीं पुरः पङ्किली
कुर्वन् पाणितले निधाय बदरीपाण्डुं कपोलस्थलीम् ।
आश्चर्यं लवणोदरोधसि वसन् शोणं दधानोऽंशुकं
गौरीभूय हरिः स्वयं वितनुते राधापदाब्जे रतिम् ॥८७ ॥ (१३५)

सान्द्रानन्दोज्ज्वलनवरसप्रेमपीयूषसिन्धोः
कोटिं वर्षन् किमपि काउर्णस्निग्धनेत्राञ्चलेन ।
कोऽयं देवः कनककदलीगर्भगौराङ्गयष्टिश्
चेतोऽकस्मान् मम निजपदे गाढमुत्तं चकार ॥८८ ॥ (६१)

यथा यथा गौरपदारविन्दे
विन्देत भक्तिं कृतपुण्यराशिः ।
तथा तथोत्सर्पति हृद्यकस्मात्
राधापदाम्भोजसुधांशुराशिः ॥८९ ॥ (८८)

कोऽयं पट्टघटीविराजितकटीदेशः करे कङ्कणं
हारं वक्षसि कुण्डलं श्रवणयोर्बिभ्रत् पदे नूपुरौ ।
ऊर्ध्वीकृत्य निबद्धकुन्तलभरप्रोत्फुल्लमल्लीस्रगा
पीडः क्रीडति गौरनागरवरो नृत्यन् निजैर्नामभिः ॥९० ॥ (१३२)

संसारदुःखजलधौ पतितस्य काम
क्रोधादिनक्रमकरैः कवलीकृतस्य ।
दुर्वासनानिगडितस्य निराश्रयस्य
चैतन्यचन्द्र मम देहि पदावलम्बम् ॥९१ ॥ (५४)

कान्त्या निन्दितकोटिकोटिमदनः श्रीमन्मुखेन्दुच्छटा
विच्छायीकृतकोटिकोटिशरदुन्मीलत्तुषारच्छविः ।
औदार्येण च कोटिकोटिगुणितं कल्पद्रुमं ह्यल्पयन्
गौरो मे हृदि कोटिकोटिजनुषां भाग्यैः पदं धास्यति ॥ ९२ ॥
(७४)

क्षणं हसति रोदिति क्षणमथ क्षणं मूर्च्छति
क्षणं लुठति धावति क्षणमथ क्षणं नृत्यति ।
क्षणं श्वसिति मुञ्चति क्षणमुदारहाहारवं

महाप्रणयलीलया विहरतीह गौरो हरिः ॥९३ ॥ (१३४)

क्षणं क्षीणः पीनः क्षणमहह साश्रुः क्षणमथ
क्षणं स्मेरः शीतः क्षणमनलतप्तः क्षणं अपि ।
क्षणं धावन् स्तब्धः क्षणमधिकजल्पन् क्षणमहो
क्षणं मूको गौरः स्फुरतु मम देहो भगवतः ॥९४ ॥ (७६)

कैवल्यं नरकायते त्रिदशपूराकाशपुष्पायते
दुर्दान्तेन्द्रियकालसर्पपटली प्रोत्खातदंष्ट्रायते ।
विश्वं पूर्णसुखायते विधिमहेन्द्रादिश्च कीटायते
यत्कारुण्यकटाक्षवैभववतां तं गौरमेव स्तुमः ॥९५ ॥ (५)

प्रवाहैरश्रूणां नवजलदकोटीरिव दृशोर्
दधानं प्रेमाध्व्या परमपदकोटिप्रहसनम् ।
वमन्तं माधुर्यैरमृतनिधिकोटीरिव तनू
च्छटाभिस्तं वन्दे हरिमहह सन्न्यासकपटम् ॥९६ ॥ (१२)

स्वतेजसा कृष्णपदारविन्दे
महारसावेशितविश्वमीशम् ।
कमप्यशेषश्रुतिगूढवेशं
गौराङ्गमङ्गीकुरु मूढचेतः ॥९७ ॥ (५७)

चैतन्येति कृपामयेति परमोदारेति नानाविध
प्रेमावेशितसर्वभूतहृदयेत्याश्चर्यधामन्निति ।
गौराङ्गेति गुणार्णवेति रसरूपेति स्वनामप्रिये
त्याश्रान्तं मम जल्पतो जनिरियं यायादिति प्रार्थये ॥ ९८ ॥ (६७)

माद्यन्तः परिपीय यस्य चरणाम्भोजस्रवत्प्रोज्ज्वल
प्रेमानन्दमयामृताद्भुतरसान् सर्वे सुपर्वेडिताः ।
ब्रह्मादींश्च हसन्ति नातिबहुमन्यन्ते महावैष्णवान्
धिक्कुर्वन्ति स्व च ज्ञानकर्मविदुषस्तं गौरमेव स्तुमः ॥९९ ॥ (६)

यो मार्गो दुरशून्यो य इह बत बलत्कण्टको योऽतिदुर्गो
मिथ्यार्थभ्रामको यः सपदि रसमयानन्दनिःस्यन्दनो यः ।
सद्यः प्रद्योतयंस्तं प्रकटितमहिमा स्नेहवद्धृद्गुहायां
कोऽप्यन्तर्ध्वान्तहन्ता स जयति नवद्वीपदीप्यत्प्रदीपः ॥ १०० ॥ (१०४)

दूरादेव दहन् कुतर्कशलभान् कोटीन्दुसंशीतल
ज्योतिःकन्दलसंवलन्मधुरिमा बाह्यान्तरध्वान्तहृत् ।
सस्नेहाशयवृत्तिदिव्यविसरत्तेजाः सुवर्णद्युतिः
कारुण्यादिह जाज्वलीति स नवद्वीपप्रदीपोऽद्भुतः ॥१०१ ॥ (१०५ )

स्वयं देवो यत्र द्रुतकनकगौरः करुणया
महाप्रेमानन्दोज्ज्वलरसवपुः प्रादुरभवत् ।
नवद्वीपे तस्मिन् प्रैभवनभक्त्युत्सवमये
मनो मे वैकुण्ठादपि च मधुरे धाम्नि रमते ॥१०२ ॥ (६२ )

बिभ्रद्वर्णं किमपि दहनोत्तीर्णसौवर्णसारं
दिव्याकारं किमपि कलयन् दृप्तगोपालमौलेः ।
आविष्कुर्वन् क्वचिदवसरे तत्तदाश्चर्यलीलां
साक्षाद्राधामधुरिपुर्वपुर्भाति गौराङ्गचन्द्रः ॥१०३ ॥ (१०९ )

यत् तद्वदन्तु शास्त्राणि यत् तद्व्याख्यान्तु तार्किकाः ।
जीवनं मम चैतन्यपादाम्भोजसुधैव तु ॥१०४ ॥ (६३ )

पादाघातरवैर्दिशो मुखरयन् नेत्राम्भसां वेणीभिः
क्षौणिं पङ्किलयन्नहो विशदयन्नट्टाट्टहासैर्नभः ।
चन्द्रज्योतिरुदारसुन्दरकटिव्यालोलशोणाम्बरः
को देवो लवणोदकूलकुसुमोद्याने मुदा नृत्यति ॥१०५ ॥ (१३६ )

धिग् अस्तु कुलमुज्ज्वलं धिग् अपि वाग्मितां धिग् यशो
धिग् अध्ययनमाकृतिं नववयः श्रियं चापि धिक् ।
द्विजत्वमपि धिक् पर:अ विमलमाश्रमाद्यं च धिक्
न चेत् परिचितः कलौ प्रकटगौरगोपीपतिः ॥१०६ ॥ (४३ )

ध्यायन्तो गिरिकन्दरेषु बहवो ब्रह्मानुभूयासते
योगाभ्यासपराश्च सन्ति बहवः सिद्धा महीमण्डले ।
विद्याशौर्यधनादिभिश्च बहवो वल्गन्ति मिथ्योद्धताः
को वा गौरकृपां विनाद्य जगति प्रेमोन्मदो नृत्यतु ॥ १०७ ॥
(९८ )

अन्तर्ध्वान्तचयं समस्तजगतामुन्मूलयन्ती हठात्
प्रेमानन्दरसाम्बुधिं निरवधिं प्रोद्वेलयन्ती बलात् ।
विश्वं शीतलयन्त्यतीव विकलं तापत्रयेणानिशं
सास्माकं हृदये चकास्तु सततं चैतन्यचन्द्रच्छटा ॥ १०८ ॥
(१७ , ७५ )

उपासतां वा गुरुवर्यकोटीर्
अधीयतां वा श्रुतिशात्रकोटीः ।
चैतन्यकारुण्यकटाक्षभाजां
सद्यः परं स्याद्धि रहस्यलाभः ॥१०९ ॥ (२५)

अपारस्य प्रेमोज्ज्वलरसरहस्यामृतनिधेर्
निधानं ब्रह्मेशार्चित इह हि चैतन्यचरणः ।
अतस्तं ध्यायन्तु प्रणयभरतो यान्तु शरणं
तमेव प्रोन्मत्तास्तमिह किल गायन्तु कृतिनः ॥११० ॥ (८९)

श्रीमद्भागवतस्य यत्र परमं तात्पर्यमुट्टङ्कितं
श्रीवैयासकिना दुरन्वयतया रासप्रसङ्गेऽपि यत् ।
यद्राधारतिकेलिनागररसास्वादैकसद्भाजनं
तद्वस्तुप्रथनाय गौरवपुषा लोकेऽवतीर्णो हरिः ॥१११ ॥ (१२२)

पात्रापात्रविचारणं न कुरुते न स्वं परं वीक्षते
देयादेयविमर्शको न हि न वा कालप्रतीक्षः प्रभुः ।
सद्यो यः श्रवणेक्षणप्रणमनध्यानादिना दुर्लभं
दत्ते भक्तिरसं स एव भगवान् गौरः परं मे गतिः ॥११२ ॥ (७७)

केचिद्दास्यमवापुरुद्धवमुखाः श्लाघ्यं परे लेभिरे
श्रीदामादिपदं व्रजाम्बुदृशां भावं भेजुः परे ।
अन्ये धन्यतमा धयन्ति मधुरं राधारसाम्भोनिधिं
श्रीचैतन्यमहाप्रभोः करुणया लोकस्य काः सम्पदः ॥ ११३ ॥
(१२३)

सर्वज्ञैर्मुनिपुङ्गवैः प्रवितते तत्तन्मते युक्तिभिः
पूर्वं नैकतरत्र कोऽपि सुदृढं विश्वस्त आसीज् जनः ।
सम्प्रत्यप्रतिमप्रभाव उदिते गौराङ्गचन्द्रे पुनः
श्रुत्यर्थो हरिभक्तिरेव परमः कैर्वा न निर्धार्यते ॥११४ ॥ (१२४)

वञ्चितोऽस्मि वञ्चितोऽस्मि वञ्चितोऽस्मि न संशयः ।
विश्वं गौररसे मग्नं स्पर्शोऽपि मम नाभवत् ॥११५ ॥ (४६)

अहो वैकुण्ठस्थैरपि च भगवत्पार्षदवरैः
सरोमाञ्चं दृष्टा यदनुचरवक्रेश्वरमुखाः ।
महाश्चर्यप्रेमोज्ज्वलरससदावेशविवशी
कृताङ्गास्तं गौरं कथमकृतपुण्यः प्रणयतु ॥११६ ॥ (४४)

कैर्वा सर्वपुमर्थमौलिरकृतायासैरिहासादितो
नासीद्गौरपदारविन्दरजसा स्पृष्टे महीमण्डले ।
हा हा धिग् मम जीवितं धिग् अपि मे विद्यां धिग् अप्याश्रमं
यद्दौर्भाग्यभरादहो मम न तद्सम्बन्धोगन्धोऽप्यभूत् ॥ ११७ ॥
(४७)

विश्वं महाप्रणयसीधुसुधारसैक
पाथोनिधौ सकलमेव निमज्जयन्तम् ।
गौराङ्गचन्द्रनखचन्द्रमणिच्छटायाः
कञ्चिद्विचित्रमनुभावमहं स्मरामि ॥११८ ॥ (१२५)

जितं जितं मयाद्यापि गौरस्मृत्यनुभावतः ।
तीर्णाः कुमतकान्ताराः पूर्णाः सर्वमनोरथाः ॥११९ ॥ (?)

दन्ते निधाय तृणकं पदयोर्निपत्य
कृत्वा च काकुशतमेतदहं ब्रवीमि ।
हे साधवः सकलमेव विहाय दूराद्
गौराङ्गचन्द्रचरणे कुरुतानुरागम् ॥१२० ॥ (९०)

पतन्ति यदि सिद्धयः करतले स्वयं दुर्लभाः
स्वयं च यदि सेवकीभवितुमागताः स्युः सुराः ।
किमन्यदिदमेव मे यदि चतुर्भुजं स्याद्वपुस्
तथापि न मनो मनाक् चलति गौरचन्द्रान् मम ॥१२१ ॥ (६४)

अहो न दुर्लभा मुक्तिर्न च भक्तिः सुदुर्लभा ।
गौरचन्द्रप्रसादस्तु वैकुण्ठेऽपि सुदुर्लभः ॥१२२ ॥ (९१)

सोऽप्याश्चर्यमयः प्रभुर्नयनयोर्यन् नाभवद्गोचरो
यन् नास्वादि हरेः पदाम्बुजरसस्तद्यद्गतं तद्गतम् ।
एतावन् मम तावदस्तु जगतीं येऽद्याप्यलङ्कुर्वते
श्रीचैतन्यपदे निखातमनसस्तैर्यत् प्रसङ्गोत्सवः ॥१२३ ॥ (५०)

उत्ससर्प जगदेव पूरयन्
गौरचन्द्रकरुणामहार्णवः ।
बिन्दुमात्रमपि नापतन् महा
दुर्भगे मयि किमेतदद्भुतम् ॥१२४ ॥ (४८)

कालः कलिर्बलिन इन्द्रियवैरिवर्गाः

श्रीभक्तिमार्ग इह कण्टककोटिरुद्धः ।
हा हा क्व यामि विकलः किमहं करोमि
चैतन्यचन्द्र यदि नाद्य कृपां करोषि ॥१२५ ॥ (४९)

कलिन्दतनयातटे स्फुरदमन्दवृन्दावनं
विहाय लवणाम्बुधेः पुलिनपुष्पवाटीं गतः ।
धृतारुणपटः पराकृतसुपीतवासा हरिस्
तिरोहितनिजच्छविः प्रकटगौरिमा मे गतिः ॥१२६ ॥ (७९)

आस्तां वैराग्यकोटिर्भवतु शमदमक्षान्तिमैत्र्यादिकोटिस्
तत्त्वानुध्यानकोटिर्भवतु भवतु वा वैष्णवी भक्तिकोटिः ।
कोट्यंशोऽप्यस्य न स्यात् तदपि गुणगणो यः स्वतःसिद्ध आस्ते
श्रीमच्चैतन्यचन्द्रप्रियचरणनखज्योतिरामोदभाजाम् ॥ १२७ ॥
(२६)

भजन्तु चैतन्यपदारविन्दं
भवन्तु सद्भक्तिरसेन पूर्णाः ।
आनन्दयन्तु त्रिजगद्विचित्र
माधुर्यसौभाग्यदयाक्षमाद्यैः ॥१२८ ॥ (९२)

ज्ञानवैराग्यभक्त्यादि
साधयन्तु यथा तथा ।
चैतन्यचरणाम्भोज
भक्तिलभ्यसमं कुतः ॥१२९ ॥ (९४)

हा हन्त हन्त परमोषरचित्तभूमौ
व्यर्थीभवन्ति मम साधनकोटयोऽपि ।
सर्वात्मना तदहमद्भुतभक्तिबीजं
श्रीगौरचन्द्रचरणं शरणं करोमि ॥१३० ॥ (५२)

सर्वसाधनहीनोऽपि परमाश्चर्यवैभवे ।
गौराङ्गे न्यस्तभावो यः सर्वार्थपूर्ण एव सः ॥१३१ ॥ (३०)
ब्रह्मेशादिमहाश्चर्यमहिमापि महाप्रभुः ।
मुग्धबालोदितं श्रुत्वा स्निग्धोऽवश्यं भविष्यति ॥१३२ ॥ (१४२)

दृष्टं न शास्त्रं गुरवो न पृष्टा
विवेचितं नापि बुधैः स्वबुद्ध्या ।
यथा तथा जल्पतु बालभावात्
तथापि मे गौरहरिः प्रसीदतु ॥१३३ ॥ (१४३)

केचित् सागरभूधरान् अपि पराक्रामन्ति नृत्यन्ति वै
केचिद्देवपुरन्दरादिष् महाक्षेपं क्षिपन्ते मुहुः ।
आनन्दोद्भटजालविह्वलतया तेऽद्वैतचन्द्रादयः
के किं नो कृतवन्त ईदृशि पुनश्चैतन्यनृत्योत्सवे ॥१३४ ॥ (२७)

अवतीर्णे गौरचन्द्रे विस्तीर्णे प्रेमसागरे ।
ये न मज्जन्ति मज्जन्ति ते महानर्थसागरे ॥१३५ ॥ (३५)

प्रसारितमहाप्रेमपीयूषरससागरे ।
चैतन्यचन्द्रे प्रकटे यो दीनो दीन एव सः ॥१३६ ॥ (३६)

गीताभागवतं पठत्वविरतं तीर्थानि संसेवतां
शालग्रामशिलां समर्चयतु वा कालत्रयं प्रत्यहम् ।
मुक्तिभ्यो महतीं पुमान् न लभते तत्कोषभूषाङ्करीं
भक्तिं प्रेममयीं शचीसुतपदद्वन्द्वानुकम्पां विना ॥१३७ ॥ (?)

आशा यस्य पदद्वन्द्वे चैतन्यस्य महाप्रभोः ।
तस्येन्द्रो दासवद्भाति का कथा नृपकीटके ॥१३८ ॥ (९६)

यस्याशा कृष्णचैतन्ये राजद्वारि किमर्थिनः ।
चिन्तामणिचयं प्राप्य को गूढो रजतं व्रजेत् ॥१३९ ॥ (९७)

माद्यत्कोटिमृगेन्द्रहुङ्कृतिरवस्तिग्मांशुकोटिच्छविः
कोटीन्दूद्भवशीतलो गतिजितप्रोन्मत्तकोटिद्विपः ।
नाम्ना दुष्कृतकोटिनिष्कृतिकरो ब्रह्मादिकोडीश्वरः
कोट्यद्वैतशिरोमणिर्विजयते श्रीश्रीशचीनन्दनः ॥१४० ॥ (१०३)

अतिपुण्यैरतिसुकृतैः कृतार्थीकृतः कोऽपि पूर्वैः ।
एवं कैरपि न कृतं यत् प्रेमाब्धौ निमज्जितं विश्वम् ॥ १४१ ॥
(१२६)

यदि निगदितमीनाद्यंशवद्गौरचन्द्रो
न तदपि स हि कश्चिच् छक्तिलीलाविकाशः ।
अतुलसकलशक्त्याश्चर्यलीलाप्रकाशैर्
अनधिगतमहत्त्वः पूर्ण एवावतीर्णः ॥१४२ ॥ (१४१)

संसारसिन्धुतरणे हृदयं यदि स्यात्
सङ्कीर्तनामृतरसे रमते मनश्चेत् ।
प्रेमाम्बुधौ विहरणे यदि चित्तवृत्तिश्

चैतन्यचन्द्रचरणे शरणं प्रयातु ॥१४३ ॥ (९३)

अचैतन्यमिदं विश्वं यदि चैतन्यमीश्वरम् ।
भजेत् सर्वतो मृत्युरुपास्यममरोत्तमैः ॥ ?? ॥ (९५)